# त्रिमुनिव्याकरणे वार्त्तिकस्यावश्यकता

**डॉ. सीता चरण झाः**

विभागाध्यक्षः, स्नातकोत्तर-व्याकरण-विभागः,

का.सिं.द.सं. विश्वविद्यालयः, कामेश्वरनगरम्, दरभङ्गा

**सारांशः**

वार्त्तिककारकात्यायनेन नूतनशब्दानां साधुत्वसाधनाय वार्त्तिकानि कृतानि। परञ्च तस्यानन्तरम् इदानीं यावत् यः शब्दः येन-केन प्रकारेण प्राप्तः, स व्याकरणशास्त्रदृष्ट्या अग्राह्य एवास्ति, तदर्थं विद्वद्भिः चिन्तनीया। संस्कृतं यदि जीवति तर्ह्यस्यां भाषायां प्रगतिरावश्यकी भवति। प्रगतिं विना भाषा कथं जीविता स्यात्।

अतएव प्राप्तनूतनशब्दानां साधुत्वप्रतिपादनाय वार्त्तिकरूपाणां ग्रन्थानामावश्यकता तु वर्त्तत एव। नूतनशब्दाः यदा भाषायामागाच्छन्ति तदा तेषां सङ्ग्रहः भाषाविद्भिः क्रियते। आङ्गलभाषायाम् इदानीमपि प्रतिवर्षं विविधाभ्यः विश्वभाषाभ्यः शब्दाः गृह्यन्ते। आङ्ग्लभाषाविदः सम्यक् विचारं विधाय तान् शब्दान् ऐकमत्येन स्वीकुर्वन्ति। अतएव आङ्ग्लभाषानुदिनं विकासमेति। एवमेव संस्कृतेऽपि यदि एतादृशी व्यवस्था क्रियेत, तर्हि इयमपि भाषा पुनर्जीविता भविष्यति। यद्यपि अत्रापि अन्यभाषातः शब्दाः आगच्छन्ति। तेषां प्रयोगोऽपि क्रियते कैश्चित्, परन्तु न तत्रैकमत्यं भवति, बहुभिः तद्विषये अपाणिनीयं मत्वा निवार्यते। पाणिनीयव्याकरणशास्त्रे यदि नवीनशब्दसाधुत्वप्रदर्शनाय कात्यायनादिभिः वार्त्तिकानि निर्मितानि तर्ह्यद्यापि तदर्थं पाणिनीयशास्त्रे ऐकमत्येन नूतनशब्दसाधुत्वविधानाय वार्त्तिकानि रचितव्यानि।

**कूटशब्दाः-** वार्त्तिकम्, प्रवचनशैली, वृत्तिः, शास्त्रप्रवृत्तिः, वृत्तिसूत्रं, व्याख्यानं, व्याख्यानसूत्रं, भाष्यसूत्रम्।

## प्रस्तावना

पाणिनिव्याकरणं संस्कृतव्याकरणक्षेत्रेऽद्वितीय मूर्धाभिषिक्तम्। अष्टाध्याय्यां संस्कृतवाङ्मयस्य शब्दानां प्रकृति-प्रत्ययनिर्धारणार्थं विरचितनियमानां यथासम्भवं वैज्ञानिकशैल्या उपस्थापनं मनुष्यबुद्धेः चरमोत्कर्षद्योतकमस्ति। यद्यपि सत्यं यत्तस्य


© Copyright @ Authors

ISSN: 2455-0760
Peer Reviewed & Refereed Journal (IF: 5.8)
Journal Website: www. sutlejgcrjournal.in

व्याकरणस्याधिकांशः पूर्वाचार्याणां नैरन्तर्यप्रयत्नात् उत्पन्न-नियमानां संकलनमात्रमेव, तथापि तन्नियमव्यवस्था तत्कार्यस्य मौलिकतां प्रददाति। अनेनैव वैशिष्ट्येन तद्व्याकरणं विस्तृतं यशः प्राप्तुं समर्थमभवत्। अतः तत्प्रभावात् पूर्वव्याकरणानि अकालं तिरोहितानि। केवलं तेषां व्याकरणानामस्तित्वं संस्कृतवाङ्मये कतिपयैरुद्धृतश्लोकैः सूत्रादिभिरेव ज्ञातुं शक्यते। इदानीं यावन्निर्मितव्याकरणानि भागद्वये विभक्तुं शक्येते- ऐन्द्रं माहेश्वरञ्च। यद्यपि जनश्रुत्यनुसारं पाणिनिव्याकरणं माहेश्वरसम्प्रदायसम्बद्धं तथापि तेन प्रभाविताः सन्तः ऐन्द्रसम्प्रदायलब्धप्रतिष्ठाः वैयाकरणाः अपि तदनुसरणे प्रवृत्ताः, तेषु कात्यायनो मुख्यः।

संस्कृतवाङ्मये त्रिमुनिव्याकरणे कात्यायनस्य अतुला कीर्त्तिः महत्त्वपूर्णा विद्यते। तत्रानेके वार्त्तिककाराः सन्ति। परञ्च कात्यायनतुलनायां न कोऽप्यन्यो वार्त्तिककारः नैव तिष्ठति। तस्याभावोऽद्यापि बहुक्षेत्रे दृश्यते। यथा- कात्यायनेन यं शब्दं प्रति न वार्त्तिकं निर्मितं, तं शब्दं प्रति अद्यपर्यन्तं वार्त्तिकरूपेण प्रतिपादनं नैव समुपलभ्यते। यथा- मन्त्री, प्रधानमन्त्री, राष्ट्रपतिः इत्यादयः। यतोहि पुरुषैर्यदा देशस्य मन्त्रिपदस्य, प्रधानमन्त्रिपदस्य, राष्ट्रपतिपदस्य उपभोगः क्रियते तदा कः प्रयुज्येत एवञ्च स्त्रीभिर्यदा उपभोगः क्रियते तदा कः प्रयुज्येत इत्येतद्विषये इदानीं यावन्न न कोऽपि निर्देशः उपलभ्यते।

संस्कृतवाङ्मये त्वनेके वार्त्तिककाराः समुपलभ्यन्ते- कात्यायनः, सुनागः, भरद्वाजः, क्रोष्टा, वाडवः, व्याघ्रभूतिः, वैयाघ्रपद्यः, भर्तृहरिः, गालवः, नागेशप्रभृतयः। तेषु कात्यायनीय वार्त्तिकानि अतिप्रसिद्धानि विराजन्ते।

कात्यायनेन तु वार्त्तिकैः पाणिनिव्याकरणस्य समीक्षात्मकं व्याख्यानं कृतम्। यद्यपि तद्वार्त्तिकं व्याख्यात्मकं तथापि मौलिकतायाः व्याख्यानभेदाच्च तस्यैकं विशिष्टं स्थानमस्ति। तेन व्याख्यानविशिष्ट-प्रक्रियां समाश्रित्य अतिसङ्क्षेपीकारणात् ऐन्द्रसम्प्रदायोपेक्षितनियमाः पाणिनिव्याकरणे समाविष्टाः। नूनमेव एनं विना पाणिनीयाष्टकमपूर्णमेव तिष्ठतिस्म। पतञ्जलिरपि पाणिनिव्याकरणस्य सरलतां, संरचनां, वैज्ञानिकताञ्च दृष्ट्वा प्रभावितः भूत्वा तस्यानुशीलनेऽग्रसरो जातः। तेन पाणिनिसूत्रोपरि समीक्षात्मकं विवरणं निर्मितं, यन्महाभाष्यनाम्ना परिज्ञायते।

भाष्ये व्याख्यानस्य द्विविधा शैली उपलभ्यते- चूर्णिका उत्कलिका च। प्रथमा वार्त्तिकानां सुगमव्याख्यानार्थं शब्दानां पृथक्-पृथक् अर्थकरणाय चूर्णिकाशैली अवलम्ब्यते, या


© Copyright @ Authors

सम्पुटीकरणनाम्नापि व्यवह्रियते। अपरा च व्याकरण-सिद्धान्तोहापोहाय आश्रीयते, या तण्डकनाम्नापि चर्चते। शैलीयं विशाला, ओजस्वी नागावलोकनसदृशी चास्ति। पतञ्जलेः विलक्षणं पाण्डित्यं व्याकरणाध्ययने प्रतिपदं परिलक्ष्यते। एवंहि यद्यपि त्रयोऽप्येते आचार्याः प्रवक्तृत्वेन, व्याख्यातृत्वेन समीक्षकत्वेन च प्रसिद्धाः सन्ति तथापि एषां समेषामाचार्याणां परिश्रमपरिणामरूपेणैव पाणिनिव्याकरणं पूर्णत्वं प्राप्तं, तदर्थं **"त्रिमुनि व्याकरणमि"**ति प्रवादोऽपि गतार्थः।

कात्यायनः पाणिनीवातीव मेधावी प्रतिभाशाली चासीत्। दृश्यते चेत्तर्हि सः पाणिन्यपेक्षया वार्त्तिकरचनायां न न्यूनं परिश्रमं कृतवान्। कात्यायनीय वार्त्तिकानां सङ्ख्या प्रायः पाणिनिप्रोक्तसूत्राणां समानैव। यथा पाणिनिसूत्रेभ्यः "**पाणिनीयं महत्सुविहितम्"** इत्युच्यते, तथैव काचिदुक्तिः कात्यायनकृत-वार्त्तिकेभ्योऽपि न्याय्यम्। कात्यायनः ऐन्द्रव्याकरणं प्रति निष्ठावान् सन्नपि पाणिनिं प्रति अपारभक्तिं धारयतिस्म, येन प्रेरितो भूत्वा स्वशास्त्रान्ते **"भगवतः पाणिनेः सिद्धम्"** इत्याशीर्वादात्मकं वाक्यं लिखितवान्। कात्यायनः पाणिनिशास्त्रं प्रति नित्यं श्रद्धां धारयन् ऐन्द्रं माहेश्वरञ्चेमौ द्वौ व्याकरणोदधी एकस्मिन् मिश्रितमिव फलतः पाणिनेः श्रेष्ठतां खण्डनमरीचिकया कुण्ठितत्वेन रक्षितवान्। कात्यायनस्य रचनात्मकविधानेन पाणिनीयशास्त्रं पुष्पितं, फलितं प्रतिमण्डितं च जातम्।

**विषयप्रवेशः**

पाणिनेः प्राक् प्राचीनव्याकरणेषु वार्त्तिकप्रवचनशैली विद्यमाना आसीन्न वेति निश्चयपूर्वकं तदैव कथयितुं शक्यते यदा किस्यचिदेकपक्षाय साधकबाधकप्रमाणं स्यात्। भाष्ये यदि उद्धृतानं भारद्वाजीय वार्त्तिकानां[1] सम्बन्धः पाणिनि- स्मृतेन भारद्वाजीयव्याकरणेन स्यात्तदा कथयितुं शक्यते यत् सूत्रपाठोपरि वार्त्तिकप्रवचनशैली प्राचीनकालादावर्ततेस्म।

प्रायः इदानीं यावत् पाश्चात्त्यानां पौरस्त्यानाञ्च विदुषां मतं विद्यते यत् पाणिनेः प्राक् वार्त्तिकैः प्रवचनस्यास्तित्वं नासीत्, परञ्च केषाञ्चिन्मते पाणिनेः प्रागपि वार्त्तिकप्रवचनशैली आसीत्। तत्र भाष्ये कतिपये ईदृशः सङ्केताः उपलभ्यन्ते, येन प्रतीयते यत् वार्त्तिकशैली पाणिनेः प्राचीना अस्ति।


© Copyright @ Authors

**वार्त्तिकस्य परिभाषा-**

वार्त्तिकं किं भवति, कस्यास्तीत्यस्य लक्षणमित्येतद्विषये निम्नलिखिताः उक्तयः प्राप्यन्ते-

पराशरोपपुराणे- **"उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्त्तिकं प्राहुः वार्त्तिकज्ञा मनीषिणः॥"**[2]

विश्वेश्वरसूरिणा- **"उक्तानुक्तदुरुक्तादि चिन्ता यत्र प्रवर्तते।**
**तद्वार्त्तिकमिति प्राहुः वार्त्तिकज्ञा विपश्चितः॥"**[3]

हेमचन्द्राचार्येण- **"उक्तानुक्तदुरुक्तानां व्यक्तिकारी तु वार्त्तिकम्।"**[4]

राजशेखरेण- **"उक्तानुक्तदुरुक्तचिन्ता वार्त्तिकम्।"**[5]

नागेशेन- **"उक्तानुक्तदुरुक्तचिन्ताकरत्वं हि वार्त्तिकत्वम्।"**[6]
**"सूत्रेऽनुक्तदुरुक्तचिन्ताकरत्वं वार्त्तिकत्वम्।"**[7]

शेषनारायणेन- **"तत्र च वार्त्तिके वररुचिरुक्तानुक्तदुरुक्ताद्यचिन्तयत्। यदुक्तम्-**
**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्त्तिकं प्राहुः वार्त्तिकज्ञा विपश्चितः॥**
**तदपि पतञ्जलिराक्षेपसमाधानपूर्वकमिष्ट्यादिभिश्च परिचस्कार।"**[8]

हरदत्तेन- **"यद्विस्मृतमदृष्टं वा सूत्रकारेण तत्स्फुटम्।**
**वाक्यकारो ब्रवीत्येवं तेनादृष्टं च भाष्यकृत्॥"**[9]
**"सूत्रकारेणानुक्तं वार्त्तिककार आह। तदुक्तं च दूषयति एवं भाष्यकारो वार्त्तिककारेण।"**[10]

विष्णुधर्मोत्तरे- **"प्रयोजनं संशयनिर्णयौ च व्याख्याविशेषो गुरुलाघवं च।**
**कृतव्युदासोऽकृतशासनं च सवार्त्तिको धर्मगुणोऽष्टकश्च॥"**


© Copyright @ Authors

एषूपर्युक्तेषु वार्तिकलक्षणेषु विष्णुधर्मोत्तरोक्तं विहाय प्रायः सर्वाणि समानानि सन्ति। नागेशेन **"सूत्रेऽनुक्त-दुरुक्तचिन्ताकरत्वं वार्तिकत्वम्"** इत्यत्र 'उक्ते'ति शब्दो न प्रयुक्तः। हरदतेन च 'दुरुक्तचिन्ता' इत्यस्य स्थानं न दत्तम्।

'वार्तिकमि'ति शब्दः वृत्तिशब्दान्निष्पन्नः। वृत्तिशब्दस्यानेकेऽर्थाः भवन्ति। भाष्यानुसारं वृत्तेरर्थः शास्त्रप्रवृत्तिः भवति- **"का पुनर्वृत्तिः? शास्त्रप्रवृत्तिः।"**[11] कात्यायनेनापि वृत्तिशब्दस्य अयमेवार्थः कृतः- **"तत्रानुवृत्तिनिर्देशे सवर्णाग्रहण-मनण्त्वात्"**[12] इति। कैयटेन च- **"वृत्तिः शास्त्रस्य लक्ष्ये प्रवृत्तिस्तदनुगतो निर्देशोऽनुवृत्तिनिर्देशः"**[13] इत्युक्तम्।

एभिः प्रमाणैः स्पष्टं भवति यत् वृत्तिशब्दस्य अभिधागम्यार्थो व्याकरणशास्त्रप्रवृत्तिरस्ति।

**"सूत्रार्थप्रधानो ग्रन्थो वृत्तिः"**[14], **"सूत्रार्थं सकलसारविवरणं वृत्तिः"**[15] इत्यादिस्थलेषु 'ग्रन्थ' इत्यस्य कृते 'वृत्ति'शब्दः प्रयुक्तः। शास्त्रप्रवृत्तेः वास्तविकप्रतीतिर्न केवलं सूत्रैर्भवति, अतः सूत्रस्य लघुव्याख्यानमपि वृत्तिनाम्ना स्मर्यते।

कैयटेन 'वार्तिक'शब्दस्य व्युत्पत्तिः **"वृत्तौ साधु वार्तिकम्"**[16] कृता। अर्थात् वृत्तौ= शास्त्र-प्रवृत्तये, साधु= यदुपयुक्तं स्यात् तद्वार्तिकं कथ्यते। अनया दृष्ट्या सङ्क्षेपे वार्तिकं सूत्राणां व्याख्यानग्रन्थः लक्षणया वृत्तेरपि विशिष्टं व्याख्यानञ्च वर्तते। **"वृत्तेर्व्याख्यानं वार्तिकम्"** इत्यत्र भाष्यकारेण व्याख्यान-शब्दस्य- **"न केवलानि चर्चापदानि व्याख्यानम्- वृद्धिः आत् ऐच् इति। किं तर्हि? उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति"**[17] इत्यर्थः कृतः।

वाक्याध्याहारो नागेशेन स्पष्टीकृतो यदन्यसूत्रेषु पठितवाक्यपूरणार्थकपदानां स्वरितत्वाधारोपरि अनुवर्तनं वाक्याध्याहारो भवति अथवा अनेन वार्तिककृद्व्याख्यानमपि सूत्रतात्पर्यविषयकं स्वीकृतम्।[18]

ये केचन प्राचीनवार्तिकग्रन्थाः उपलभ्यन्ते ते सद्यः सूत्रपाठस्य मूलग्रन्थकारप्रोक्तवृत्त्याश्रिताः सन्ति। वृत्तिः= शास्त्रप्रवृत्तिः, अर्थात् वृत्तेर्व्याख्यानं तत्सहायकं वा यत् स्यात् तद्वार्तिकमस्ति। अनया दृष्ट्या सूत्राणां कृते 'वृत्तिसूत्रम्'[19] इत्यस्य व्यवहारः कृतोऽस्ति। स च वृत्तिसम्बन्धित्वात् वार्तिकमुक्तम्, यतोहि तस्य रचना वृत्त्याधारिता जाता। एवमेव भाष्यस्य आधारभूतत्वात् वार्तिकं 'भाष्यसूत्रम्'[20]


© Copyright @ Authors

इति नाम्ना व्यवहृतम्, अर्थात् प्राचीनपरम्परानुसारं सूत्रं, वृत्तिः भाष्यञ्च क्रमशः इत्येवं ग्रन्थरचनाशैली आसीत्।

आधुनिकाः वार्त्तिकनाम्ना येऽपि ग्रन्थाः उपलभ्यन्ते ते सर्वे छन्दोबद्धाः गद्यमयाः वा सन्ति, न तु सूत्रशैल्याः। यथा- तन्त्रवार्त्तिकं, श्लोकवार्त्तिकं, न्यायवार्त्तिकं, प्रमाणवार्त्तिकं, बृहदारण्यकवार्त्तिकं, पुरुषकारवार्त्तिकं निरुक्तवार्त्तिकञ्चेति, इमे सर्वे न तत्तद्विषयकेषु सूत्रेषु वृत्तिषु वा, अपितु भाष्याधारिताः सन्ति। अतएव एषु वार्त्तिकेषु वार्त्तिकशब्दस्य मूलार्थः असङ्गतोऽस्ति। एतदर्थमत्र वार्त्तिकशब्दस्य प्रयोगो लाक्षणिक एव स्वीकरणीयः। मन्मते उपरिलिखितानां वार्त्तिकग्रन्थानां लक्षणायैव "उक्तानुक्त०" इत्यादिलक्षणं रचितम्।

सूत्रलक्षणाधारोपरि वार्त्तिकमपि सूत्रनाम्ना स्मर्यते। स्वयं भाष्यकारेणापि वार्त्तिकं सूत्रनाम्ना व्यवहृतम्।[21] अस्यामवस्थायां सूत्रवार्त्तिकयोः किमन्तरम्? अनयोः भेदकतत्त्वं सर्वप्रथमं शाब्दिकमेवास्ति। सूत्रं शास्त्रप्रवृत्तेः (वृत्तेः) साधनमस्ति। परञ्च- **"न हि सूत्रत एव शब्दाः प्रतिपद्यन्ते। किं तर्हि। व्याख्यानतश्च"** इति भाष्यवचनेन स्पष्टं भवति यत् शब्दप्रतिपत्तये न केवलं सूत्रैरेव कार्यं सम्पद्यते, अपितु व्याख्यानमपि अपेक्षितं भवति। सूत्राणां 'व्याख्यानं' वार्त्तिकं भवति। व्याख्येयं सूत्रम् एवं व्याख्यानं वार्त्तिकं स्तः, यतोहि वृत्त्यैव वार्त्तिकशब्दो निष्पन्नः। सूत्राणां कृते 'वृत्तिसूत्रम्'[22] एवञ्च वार्त्तिकानां कृते 'व्याख्यानसूत्रम्'[23] 'भाष्यसूत्रम्'[24] वेति शब्दः प्रयुज्यते।

वार्त्तिकानां सूत्राणाञ्च भेदं स्पष्टीकरोति भर्तृहरिः- **"भाष्यसूत्रे गुरुलाघवस्यानाश्रितत्वात्।"**[25] पुनश्चान्यत्र- **"न च तेषु भाष्यसूत्रेषु गुरुलघुप्रयत्नः क्रियते तथाह- नहीदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति"**[26] इति।

स्पष्टतयैवात्र वृत्तिसूत्रेभ्यो भेदो दर्शितः। येन प्रकारेण सूत्रेषु मात्रायाः वर्णस्य वा लाघवगौरवयोः चर्चा कृता, भाष्यसूत्रेषु (वार्त्तिकेषु) न तथा। इदमेव कारणमस्ति यत् **'नहीदानीमाचार्याः'** इत्युक्त्वा दुरुक्तिदोषो न दोषरूपेण स्वीकृतः।

भाष्ये वार्त्तिकानामपि अस्तित्वं विद्यते, परञ्च काठिन्यं तद्वर्तते यत् पृथक् वार्त्तिकपाठरूपे न कश्चिद् ग्रन्थः उपलभ्यते। यान्यपि वार्त्तिकानि मन्यन्ते, तानि सर्वाणि भाष्ये एव सन्ति। अस्यामवस्थायां वस्तुतः को भाष्यांशः कश्च वार्त्तिकांशः? इत्यस्य परिज्ञानमतीव कठिनं विद्यते। केषुचित् पुस्तकालयेषु वार्त्तिकपाठनाम्ना केचन


© Copyright @ Authors

ISSN: 2455-0760
Peer Reviewed & Refereed Journal (IF: 5.8)
Journal Website: www. sutlejgcrjournal.in

हस्तलिखिताः ग्रन्थाः उपलभ्यन्ते, येषामन्ते 'कात्यायनविरचितम्' इति पाठोऽस्ति। परञ्च स ग्रन्थः कश्चित् पृथक् वार्त्तिकपाठः स्यात्, न तथा, स च भाष्यात् सङ्गृहीतः सङ्ग्रहग्रन्थोऽस्ति। नैतावदेव, तेषां सङ्ग्रहोऽपि अतीव निरर्थकः, दोषपूर्णः, नवीनश्च वर्तते। भाष्य-व्याख्यातृभिः अन्यैर्वा पाणिनेरुत्तरवर्तिभिः वृत्तिकारैः एतद्विषये न किमपि प्रकाशितो यदेवंविधोंऽशः वार्त्तिकमस्ति। आम्, केषुचित् स्थानेषु केवलं वार्त्तिकं वार्त्तिककारो वेत्यादिभिः शब्दैः कश्चित् सङ्केतोऽवश्यं प्राप्यते, किन्तु केवलं तावदेव वार्त्तिकपरिज्ञाने न साधकं भवति। अतो वार्त्तिकानां भाष्यात् पृथक्करणाय कश्चित् मानदण्डः स्यात्, येनैतद् वार्त्तिकमेतच्च भाष्यमिति ज्ञातुं शक्नुमः।

एक एव निर्माता स्वरचिते ग्रन्थे एकस्मिन्नेव विषये द्विविधे व्याख्याशैल्यौ नानुसरति, अतो भाष्ये द्वौ पृथग्भेदौ स्तः यौ भाष्ये स्थापितौ। तत्र कल्पयितुं शक्यते यत् यत्र वाक्यांशो व्याख्यानञ्चोभे प्रस्तुते तत्रैकं न पतञ्जलेः। वाक्यांशानां भाषा शैली च पृथक्-पृथक् स्तः, अतो भाष्यस्य वाक्यांशानाञ्च निर्मातारौ भिन्नौ। पतञ्जलेरुद्धरणप्रक्रिया यया वाक्यांशाः उद्धृताः, ते तत्स्पष्टयति यदेषां वाक्यांशानां निर्माता पतञ्जलेर्भिन्नोऽस्ति। एते एव व्याख्येयवाक्यांशाः वार्त्तिकनाम्ना इत्युच्यन्ते।

मुनित्रयेषु न कश्चित्कस्यचित् प्रशंसकः मित्रं वा नैव च कश्चित्कस्यचित् शत्रुर्वा आसीत्। कात्यायनपतञ्जलयोः सम्मुखे केवलम् एकमेवोद्देश्यम् आसीत्- शब्दसिद्धिः। तद्यथा- **"येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्।"**[27]

अर्थात् लघूपायेन अधिकाधिकशब्दानां ज्ञानं भवेत्। यद्यप्येते शब्दाः अन्यत्र पठितास्तथाप्यत्र निहितो भावो भाष्यकारस्य हार्दिक्यभिलाषायाः प्रतिनिधित्वं करोति। अर्थात् यथासम्भवं स्वल्पैः शब्दैः अधिकं ज्ञानमपरत्र संक्षेपीकरणम्। कात्यायनस्यापि इयमेव दृष्टिरासीत्, परञ्च सहैव, इदमपि न विस्मर्तव्यं यत् व्याकरणं भाषाज्ञानस्य साधनमस्ति। अतएव यत्र पाणिनिना स्वातिसंक्षिप्तदिशायां केचन नियमाः परित्यक्ताः, तत्र कात्यायनेन यथासम्भवं (स्वमते) स्वल्पाः नियमाः निर्मिताः, ये पूरकवार्त्तिकानि सन्ति। वार्त्तिकानि सूत्राणां व्याख्यानानि सन्ति। अतो व्याख्यानत्वादावश्यकं भवति यदुदाहरणमपि (प्रयोजनमपि) प्रस्तुयात्, प्रत्युदाहरणं सूत्रोपरि आक्षेपो वापि कुर्यात्, तस्य समाधानमपि कुरुत एवञ्च यदि वास्तविकदोषः स्यात्तर्हि तदपि अग्रे स्थापयतु, अनया दृष्ट्यैव वार्त्तिकानि निर्मितानि। अतः कात्यायनः केवलं पाणिनि-सूत्राणां व्याख्याता एवास्ति, न सः पाणिनेः शत्रुः, न मित्रं


© Copyright @ Authors

वेति। सः ऐन्द्रसम्प्रदायसम्बद्धोऽस्ति, सहैव; काशकृत्स्नव्याकरणप्रभावितः। अस्मादेव कारणात्तस्य सम्प्रदायस्य आवश्यकनियमानां माहेश्वरसम्प्रदायस्य पाणिनिव्याकरणे प्रवर्तनं कात्यायनस्य मुख्यमुद्देश्यमासीत्।

पतञ्जलेरपि दृष्टिः संक्षेपीकरणमेवासीत्। तेषां समक्षं पाणिन्यादीनां सूत्राणि कात्यायनादीनाञ्च वार्त्तिकानि आसन्। एतदर्थं तेन समाक्षेपदृष्टिकोणमाश्रित्य पाणिनिसूत्राणि वार्त्तिकानि च परीक्षितानि। यथासम्भवमन्यानि साधनानि (योगविभागज्ञापकपरिभाषादीनि) अवलम्ब्य छात्राणां मनसि अतिकण्ठस्थी-करणस्य भारं लघु कृतम्। शब्दानां सिद्ध्यर्थं नियमनिर्माणं विनैव कार्यं सम्पादितं, स नियमः वार्त्तिककारस्य सूत्रकारस्य वा स्यात्, परञ्च तेन सह समकालीनभाषा अपि न परित्यक्ता। इदमेव कारणमस्ति यत् भाषायां केचन नूतनशब्दाः प्रयुक्ताः आसन् तथा च केचन नियमाः शब्दसिद्ध्यर्थं कात्यायनस्य पाणिनेर्वा द्वयोः दृष्टौ भ्रान्त्या संक्षेपीकरणेन वा न समाविष्टाः, तेषां समकालीनभाषाधारेण नियमनिर्माणम् आवश्यकमिति ज्ञात्वा भाष्यकारेण नूतननियमाः अपि निर्मिताः। सहैव, व्याख्यान-परिभाषाधारेण यस्यावलम्बनं कात्यायनेन सूत्रव्याख्यायाने कृतमासीत्, वार्त्तिकानां सूत्राणाञ्चोभयोः व्याख्यानं कृतम्। तेन पाणिनेर्नियमाः अपि संक्षिप्ताः, सहैव कात्यायनस्य नियमा अपि संक्षिप्ताः। केषुचित् स्थानेषु यत्र कात्यायनेन पाणिनेः संक्षेपीकरणार्थनियमाः अनावश्यकममन्यन्त, तत्र तेषामपि युक्तियुक्तत्वं परीक्षितम् आवश्यकं दृष्टिकोणञ्च स्वीकृतम्। बहुषु स्थलेषु कात्यायनस्य संक्षेपीकरणं परिपुष्टम्। केषुचित् स्थानेषु असम्भाव्यसंक्षेपीकरणस्य अयथार्थत्वमपि दर्शितमस्ति। सहैव, इदमपि न विस्मर्तव्यं यदष्टाध्याय्याः अध्ययनाध्यापनं प्रचलितमासीत्, वार्त्तिकन्तु व्याख्यानग्रन्थोऽस्ति। अतो वार्त्तिकापेक्षया अष्टाध्यायीसूत्राणि अधिकम् उपयुक्तानि, तानि स्मरणे विशेषकाठिन्यं नास्ति। अतस्तेषां वार्त्तिककृतपरिवर्तनानां परिवर्धनानां वा तदपेक्षया सूत्राणां कण्ठस्थीकरणं शास्त्राध्ययने सहजतया सहायकं भविष्यति, इति विचारेण सूत्रकृतो न्यासः उचितं मन्यतेस्म। केषुचित् स्थानेषु कात्यायनस्य परिवर्तनं, परिवर्धनञ्चापि स्वीकृतमस्ति। केषुचित् स्थानेषु स्वयमेव परिवर्तनं परिवर्धनञ्च सूचितम्। केषुचित् स्थानेषु व्याख्यानप्रसङ्गे पाणिनीसूत्रेषु येषां संशयानां कात्यायनः समाधाने असमर्थः आसीत्, तेषामुत्तरं दत्तम्।


© Copyright @ Authors

एवंप्रकारेण सर्वेषु संक्षेपीकरणस्य प्रवृत्तिरतिष्ठत्। यथा पाणिनिना अन्येषां बृहद्व्याकरणानां संक्षेपीकरणं कृतं नूतनं नियममपि निर्मितम्, तथैव कात्यायनेनापि पाणिनिसूत्राणां व्याख्यानं, संक्षेपीकरणमेवञ्च नूतननियमानां निर्माणं कृतम्। पतञ्जलिनापि एषा एव व्यवस्था अङ्गीकृता। परञ्च सर्वैः भाषाविद्भिः भाषाश्रयणं कृतं तदाधारेण च व्याख्यानं, परिवर्त्तनं, परिवर्धनञ्चापि कृतमिति न विस्मर्त्तव्यम्। एवंप्रकारेण न कश्चित् कस्यचित् प्रशंसको मित्रं वा, न च कस्यचित् कस्यचित् प्रतिद्वन्द्वी आसीत्।

महाभाष्ये उद्धृतानि न सर्वाणि वार्त्तिकानि कात्यायनकृतानि सन्ति, यानि च भाष्यस्य गम्भीरविवेचनया सिद्ध्यति। भाष्ये उपलब्धेषु वार्त्तिकेषु बहूनि भाष्यकारस्य कानिचन अन्येषामाचार्याणां चापि वचनानि सन्ति।

भाष्ये द्विविधा शैली उपलभ्यते। यत्र पाणिनिसूत्रेषु कोऽपि संशयः उत्थापनीयो भवति, तत्र शङ्कां कृत्वा कुत्रचित् **'किं चातः'** कुत्रचिच्च **'कश्चात्र विशेषः'** इमे द्वे वाक्ये प्राप्येते। भाष्यकारेण इमे द्वे वाक्ये प्रस्तुत्य महत्तमं समस्या-समाधानं कृतम्। एतयोर्द्वयोः शैल्योराधारेण भाष्याणां श्लोकानाञ्च परिज्ञानाय उपयुक्तानि प्रमाणानि प्रस्तुतानि सन्ति भाष्यकारेण। अर्थात् संशयस्थापनानन्तरं यदि **'किं चातः'** इति वाक्यस्य प्रयोगः स्यात्तदा तदनन्तरं विचारो भाष्यकारस्यैव भविष्यति एवञ्च संशयस्थापनानन्तरं यदि **'कश्चात्र विशेषः'** वाक्यं स्यात्तदा तदव्यवहितोत्तरमवश्यमेव वार्त्तिकं भवितव्यम्।

यद्यपि पाणिनेः पूर्वमपि व्याकरणोपरि पर्याप्तं कार्यं कृतमासीत् तथापि पाणिनेरनन्तरम् अस्मिन् शास्त्रोपरि विभिन्नदृष्ट्या विचारः कृतः। पाणिनेः प्राक् ऐन्द्रमाहेश्वरसम्प्रदायसम्बद्धे व्याकरणे पृथक्-पृथगेव दृश्येते स्म। पाणिनिप्रोक्तस्य ग्रन्थस्य इदमेव वैशिष्ट्यमस्ति यत् किम् ऐन्द्रसम्प्रदायः किं वा माहेश्वरसम्प्रदायः, उभयानुवर्तिभिः आचार्यैरिदं विस्तारितं विकसितञ्च जातम्। पाणिनिना स्वसमकालीन-भाषायाः प्राचीनव्याकरणनियमानां च आधारेण भाषाविज्ञानाय सर्वोत्तमः सङ्ग्रहः कृतः, तत्रापि भाषायाः आधारेण बहूनि परिवर्तनानि आवश्यकान्यासन्। केचन एतादृशाः नियमाः अप्यासन् ये अतिसंक्षेपीकरण-कारणात् पाणिनेः संग्रहे स्थानं न प्राप्नुवन्, परञ्च भाषादृष्ट्या तेऽतीव उपादेयाः आसन्, तान् नियमान् व्याकरणशास्त्रे प्रवेशाय वार्त्तिककारेण पाणिनिव्याकरणस्य व्याख्यानमिषवार्त्तिकानां रचना कृता।


© Copyright @ Authors

यद्यपि वार्त्तिकानां स्थितिः पाणिनेः प्राचीना, तथापि पाणिनिव्याकरणवार्त्तिकेषु सर्वाधिकानां वार्त्तिकानां निर्माता व्याख्याता वा कात्यायन एवास्ति। तस्य वार्त्तिकपाठो व्याकरणस्य महत्त्वपूर्णमङ्गं वर्तते। एनं विना पाणिनिव्याकरणं नूनमेव अपूर्णं तिष्ठति। पृथक्तया न कोऽपि वार्त्तिकग्रन्थः उपलभ्यते, परञ्च महाभाष्ये पठितानां वार्त्तिकानामाधारेण ज्ञायते यदेतद् वार्त्तिकं कात्यायनस्य वर्तते।

नागेशहरदत्तादिभिराचार्यैः[28] वार्त्तिककारः वाक्यकारत्वेन सम्बोधितोऽस्ति। हेमहंसगणिना[29] गुणरत्नसूरिणा[30] च वार्त्तिककारनिर्मितधातवः वाक्यकारीयनाम्ना सम्बोधिताः। सांख्यसप्ततेः युक्तिदीपिकायां पदकारनाम्ना वार्त्तिककारः स्मृतोऽस्ति।[31] महाभाष्ये वार्त्तिककारस्य नाम कात्यायन इत्युक्तम्।[32] अतः कथयितुं शक्यते यन्महाभाष्यस्य मुख्यो वार्त्तिकनिर्माता कात्यायन एवास्ति।

भाष्ये कात्यायनस्य वार्त्तिकानां मुख्यता अस्ति, परञ्च तेन स्वव्याख्याप्रसङ्गे अन्येषामपि वार्त्तिककाराणां वचनानि स्थापितानि।

कात्यायनस्य कृते कात्यः, कात्यायन, पुनर्वसुः, मेधाजित्, वररुचिः प्रभृतीनां शब्दानां प्रयोगो भवति। परञ्च एतेषु सर्वेषु कात्यायनो वररुचिश्चेमे द्वे नामनी अधिके प्रसिद्धे स्तः।

कात्यायनस्य पाणिनिसूत्रव्याख्याशैली सूत्रमयी विद्यते, अतः सूत्रे येन प्रकारेण सङ्केताक्षराणां प्रयोगः क्रियते, तद्वदेव अत्रापि कृतोऽस्ति। व्याख्याने यथा लाघवं गौरवञ्च नाद्रियते, तथैव वार्त्तिकेष्वपि लाघवं गौरवञ्च प्रति विशेषो नादृतः। वृत्तिसूत्रे तु अर्धमात्रायाः लाघवोऽपि बहुमहत्त्वपूर्णं भवति।[33] येन प्रकारेण सूत्रेषु सङ्केताक्षरेभ्यः साङ्केतिकपदेभ्यश्च अर्थबोधो जायते, तथैव कात्यायनेनापि स्वव्याख्यानपद्धतौ विशिष्टानां सङ्केतानामनुसरणं कृतम्।

**निष्कर्षः**

कात्यायनः प्राचीनभारतीयः ग्रन्थकर्त्तृत्वेन स्मर्यते। भारतस्य नैकभागे अनेकेषु पुराणेतिहासस्य शास्त्राणाञ्च ग्रन्थैः सह कात्यायनस्य नाम श्रूयते। किन्त्वयं कात्यायनो वार्त्तिककारनाम्ना प्रथितः। अनेन रचितानि वार्त्तिकानि सूत्रव्याख्यानरूपाणि सन्ति। वार्त्तिकं सूत्रेषु प्रयुक्तानां पदानां प्रयोजनचिन्तनम्, अनुक्तानां पदानां योजनं, दुरुक्तानां पदानां समीकरणञ्च करोति। वार्त्तिकानि


© Copyright @ Authors

पृथग्ग्रन्थरूपेण नोपलभ्यन्ते। महाभाष्ये तानि सम्मिलितानि सन्ति। कात्यायनस्य वार्त्तिकशैली सूत्रशैलीमेवा अनुकरोति। कात्यायनेन व्याकरणस्य समृद्धिः विशेषतः वर्धिता अस्ति।

अतएव प्राप्तनूतनशब्दानां साधुत्वप्रतिपादनाय वार्त्तिकरूपाणां ग्रन्थानामावश्यकता तु वर्त्तत एव। नूतनशब्दाः यदा भाषायामागाच्छन्ति तदा तेषां सङ्ग्रहः भाषाविद्भिः क्रियते। आङ्गलभाषायामिदानीम् अपि प्रतिवर्षं विविधाभ्यः विश्वभाषाभ्यः शब्दाः गृह्यन्ते। आङ्ग्लभाषाविदः सम्यक् विचारं विधाय तान् शब्दान् ऐकमत्येन स्वीकुर्वन्ति। अतएव आङ्ग्लभाषानुदिनं विकासमेति। एवमेव संस्कृतेऽपि यदि एतादृशी व्यवस्था क्रियेत ,तर्हि इयमपि भाषा पुनर्जीविता भविष्यति। यद्यपि अत्रापि अन्यभाषातः शब्दाः आगच्छन्ति। तेषां प्रयोगोऽपि क्रियते कैश्चित्, परन्तु न तत्रैकमत्यं भवति, बहुभिः तद्विषये अपाणिनीयं मत्वा निवार्यते। पाणिनीयव्याकरणशास्त्रे यदि नवीनशब्दसाधुत्वप्रदर्शनाय कात्यायनादिभिः वार्त्तिकानि निर्मितानि तर्ह्यद्यापि तदर्थं पाणिनीयशास्त्रे ऐकमत्येन नूतनशब्दसाधुत्वविधानाय वार्त्तिकानि रचितव्यानि।

**सन्दर्भसूची-**


1. महाभाष्यम्- 1.1.20, 1.2.22, 1.3.67, 3.1.38, 47, 89, 4.1.79, 6.4.47, 155
2. पराशरोपपुराणम्, अध्यायः- 7
3. सिद्धान्तसुधानिधिः, भागः- 1, पृष्ठम्- 3
4. हेमशब्दानुशासनम्।
5. काव्यमीमांसा- पृष्ठम्- 11
6. महाभाष्यम्, उद्योतः- 7.3.59
7. महाभाष्यम्, उद्योतः- 1.1.1
8. सूक्तिरत्नाकर का हस्तलेख, पृष्ठम्- 2
9. पदमञ्जरी, भागः- 1, पृष्ठम्- 7
10. पदमञ्जरी, भागः- 1, पृष्ठम्- 51
11. महाभाष्यम्, भागः- 1, पृष्ठम्- 13



© Copyright @ Authors

12. महाभाष्यम्, भागः- 1, पृष्ठम्- 16

13. महाभाष्यम्, प्रदीपः, पृष्ठम्- 77

14. पदमञ्जरी, पृष्ठम्- 1

15. काव्यमीमांसा, पृष्ठम्- 11

16. महाभाष्यम्, प्रदीपः- 4.2.60

17. महाभाष्यम्, भागः- 1, पृष्ठम्- 11

18.“**वाक्यघटकपदानां सूत्रान्तरे श्रुतानां स्वरितत्वप्रतिज्ञयाध्याहारकल्पनमित्यर्थः।**

**यद्वा वाक्याध्याहार इत्यनेन वार्त्तिककृद्व्याख्यानानां सूत्रतात्पर्यविषयता वाक्यैकदेशन्यायेन सूचिता।”**

- महाभाष्यम्, उद्योतः, पृष्ठम्- 60

19. महाभाष्यम्- 2.1.1, 2.2.24, भागः- 1, पृष्ठम्- 371, 424

20. भाष्यदीपिका, पृष्ठम्- 48, 281, 282

21. “**न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति।**”- महाभाष्यम्- पस्पशाह्निकम्।

22. पाणिनिसूत्राय महाभाष्ये द्वयोः स्थानयोः ‘वृत्तिसूत्रं’ शब्दः उपलभ्यते- **“वृत्तिसूत्रवचनप्रामाण्यात्”** (2.1.1), अपरत्र च- **“केचित्तावदाहुर्यवृत्तिसूत्रम्”** (2.2.27) इति। चीनी यात्री इत्सिंगेनापि ‘इत्सिंग की भारतयात्रा’ इत्यत्र (268 इति पृष्ठे) ‘वृत्तिसूत्र’शब्दस्य प्रयोगः कृतः। न्यायमञ्जर्यामुद्धृते एकस्मिन् श्लोके (पृष्ठम्-418) ‘वृत्तिसूत्र’शब्दस्योल्लेखः प्राप्यते-

**“वृत्तिसूत्रं तिलमाषा: कपची कौद्रवोदनम्।**

**अजडाय प्रदातव्यं जडीकृतमुत्तमम्॥”**

सर्वार्थसिद्धेः (4.22) स्वोपज्ञवृत्तौ लिखितम्- “**विशेषणं विशेष्येण इति वृत्तिः।”** अत्र **“विशेषणं विशेष्येण”** इति जैनेन्द्रव्याकरणस्य (1.3.52) सूत्रमस्ति। अतः वृत्तिसूत्रस्यार्थो व्याकरणसूत्रं भवति।


© Copyright @ Authors

23. **"वृत्तेर्व्याख्यानं वार्त्तिकम्"** अर्थात् वृत्तेर्व्याख्यानं वार्त्तिकं भवति। कैयटेनापि प्रदीपे वार्त्तिकाय व्याख्यानसूत्रस्य प्रयोगः कृतः- **"व्याख्यानसूत्रेषु लाघवानादरात्"** (8.2.6) इति। अत्रैव उद्योते- **"व्याख्यानसूत्रेष्विति। वार्त्तिकेष्वित्यर्थः"** इत्युक्तम्।

24. येषु सूत्रेषु भाष्यं लिख्येत् अथवा यानि भाष्यग्रन्थानां मूलभूतानि वाक्यानि, सूत्राणि स्युः तानि 'भाष्यसूत्राणि' सन्ति। भाष्यदीपिकायां द्वयोः स्थानयोः (पृष्ठम्- 48, 281-282) 'भाष्यसूत्र'शब्दस्य प्रयोगः कृतः। ऋग्वेदादिभाष्यभूमिकायां (पृष्ठम्- 376 तृतीय संस्करणे) **"अर्थ गत्यर्थः शब्दप्रयोगः इति भाष्यसूत्रम्"** इत्युक्तम्। हर्षवर्धनेन लिङ्गानुशासनटीकायां वार्त्तिकस्यार्थः 'भाष्यसूत्रं' कृतः (**"वार्त्तिकं भाष्यसूत्राणि"** कारिका 44)।

25. भाष्यदीपिका, पृष्ठम्- 48

26. भाष्यदीपिका, पृष्ठम्- 281

27. महाभाष्यम्- भाग 1, पृष्ठम्- 6

28. महाभाष्यम्, उद्योतः- **"वाक्यकारो वार्त्तिकमारभते।"**- 6.1.135,

**"यद्विस्मृतमदृष्टं वा सूत्रकारेण तत्स्फुटम्।**

**वाक्यकारो ब्रवीत्येवं तेनादृष्टं च भाष्यकृत्॥"** पदमञ्जरी, भागः- 1, पृष्ठम्- 7

**"चुलुम्पादयो वाक्यकारीयाः।"**- धातुवृत्तौ, पृष्ठम्- 402, **"एषा भाष्यकारस्य कल्पना न वाक्यकारस्य।"**- भाष्यदीपका, पृष्ठम्- 160, **"धर्माय नियमं चाह वाक्यकारः प्रयोजनम्।"**- तन्त्रवार्त्तिकम्, 138, पृष्ठम्- 287, काशिकाविवरणपंजिका- 6.2.11, **"सौत्राश्चुलुम्पादयश्च वाक्यकारीया धातवः।"**- क्षीरतरङ्गिणी, पृष्ठम्- 322, हेलाराजेन वाक्यपदीयटीकायाम्, काण्डम्- 3, पृष्ठम्- 2, 12, 27, **"सौत्राश्चुलुम्पादयश्च वाक्यकारीया उदाहार्याः।"**- हेमधातुपारायणान्ते।

29. **"एवं लौकिकवाक्यकरणीयानाम्।"**- न्यायसंग्रहः, पृष्ठम्- 122, 130

30. **"चुलुम्पादयो वाक्यकरणीयाः।"**- क्रियारत्नसमुच्चयः, पृष्ठम्- 284

31. **"पदकारश्चाह- जातिवाचकत्वादिति।"**- पृष्ठम्- 7


© Copyright @ Authors

32. "**न स्म पुराद्यतन इति ब्रुवता कात्यायनेनेह, स्मादिविधिः पुरान्तो यद्यविशेषेण भवति किं वार्त्तिककारः करोति, न स्म पुराद्यतन इति।"**- महाभाष्यम्- 3.2.118

33. "**अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।"**- परिभाषेन्दुशेखरः- 133


© Copyright @ Authors